कर्मसंज्ञायां कर्तुरिति पदविमर्शः

नयनचौधुरी*

Abstract

[गुरुभिः कारकप्रकरणं पाणिनीयव्याकरणस्य हृदयमिति प्रतिपादितम्। यतोहि कारकप्रकरण एव दार्शनिकविचाराः यथेच्छं लभ्यन्ते। अत्र कर्मसंज्ञाविधायकेषु बहुषु सूत्रेषु कर्तुरीप्सिततमं कर्मेति सूत्रं बहुव्याख्यातं प्रौढग्रन्थेषु, किन्तु कर्तुरिति पदं न तथा। अतः शोधप्रबन्धेस्मिन् कर्मसंज्ञाविधायकस्य कर्तुरीप्सिततमं कर्म इति सूत्रस्य कर्तुरिति पदं विचारितम्। कर्तृपदात् षष्ठी कथमागता, कस्मिन्नर्थे चागता, ईप्सिततमशब्दात् व्यापारविशिष्टफलाश्रयत्वप्रकारिकेच्छानिरूपितोद्देश्यताश्रयरूपार्थस्य कथं प्राप्तिः, ईप्सिततमशब्दस्य रूढित्वस्वीकारे के दोषाः, ईप्सिततमशब्दस्य यौगिकत्वस्वीकारे किं मानम्, कर्तुरिति पदाभावे के दोषाः, कर्तुरिति पदोपादानेऽपि के दोषाः, कथञ्च तेषां निराकरणम् इत्येते विषया इह प्रतिपादिताः।]

कुञ्चिकाशब्दाः— कर्ता, ईप्सिततमम्, ईप्सितः, व्यापारः, फलाश्रयः, निरूपकः, उद्देश्यता, प्रकारता, प्रयोज्यत्वम्।

उपक्रमः

द्वितीयाविभक्तिप्रयोजककर्मसंज्ञाविधायकसूत्रेस्मिन् त्रीणि पदानि सन्ति। तानि यथा कर्तुः इति षष्ठ्यन्तपदम्। ईप्सिततमम् इति प्रथमान्तपदम्। कर्म इति प्रथमान्तपदम्। तत्र कर्तुरिति पदघटक-ङस्प्रत्ययज्ञानम् ईप्सिततममिति पदज्ञानाधीनम्। अतः प्रसङ्गप्राप्तम् ईप्सिततमं निरूप्यते। ईप्सितशब्दस्य योगरूढिभेदेनार्थद्वयं विद्यते। अभीष्टेभीप्सितं हृद्यं दयितं वल्लभं प्रियमिति कोशात् रूढ्या अभिप्रेतार्थकः ईप्सितशब्दः। योगेन क्रियापरः ईप्सितशब्दः। प्रकृते यौगिकः क्रियापरः स्वीकृतः। अत एवाह शब्दरत्ने "अनेन व्याख्यानात् क्रियाशब्दः एवात्रेप्सितशब्दो न त्वभिप्रेतपरो रूढ इति सूचयति"।[१] योगाद् रूढेर्बलवत्त्वेऽपि तत्त्यागे मानं भाष्यम्। तथाहि वारणार्थानामिति सूत्रभाष्ये— "किमुदाहरणम्? माषेभ्यो गा वारयति। भवेद्यस्य माषा, न गावस्तस्य माषा

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु; Email : nayanchowdhuryvedvid@gmail.com

[१] *प्रौढमनोरमा* (शब्दरत्नान्यटीकासहिता), पृ. ४२

ईप्सिताः स्युः, यस्य तु खलु गावो, न माषाः कथं तस्य माषा ईप्सिताः स्युः ? तस्यापि माषा एवेप्सिताः ।"[२] तत्रैव कैयटः—"ईप्सितशब्दः क्रियाशब्दः आश्रीयते न तु रूढिशब्दः । तत्र वारणक्रियया परकीया अपि माषा वारयितुमीप्सिता भवन्ति ।"[३] एवञ्च भाष्ये ईप्सितशब्दस्य रूढित्वाभिप्रायेण प्रश्नः, यौगिकत्वाभिप्रायेण च समाधानं प्रदत्तं भगवता भाष्यकारेण । वारणार्थानामीप्सितः इति सूत्रे यौगिकः क्रियापरः ईप्सितशब्दः स्वीकृतः । इदञ्चोपलक्षणम् । अतः कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितम्, स्पृहेरीप्सितः इत्यादिष्वपि बोध्यम् ।

ईप्सिततमपदविचारः

आप्लृ व्याप्तौ इति धातोः "धातोः समानकर्त्तृकादिच्छायां वा" [अष्टाध्यायी ३.१.७] इति सूत्रेण इच्छायां सन्प्रत्यये "सन्यङोः" [अष्टाध्यायी ६.१.९] इति सूत्रेण अजादेर्द्वितीयस्य द्वित्वे आप्सप्स इति जाते "आज्ञाप्यृधामीत्" [अष्टाध्यायी ७.४.४४] इति सूत्रेण आकारस्य ईत्वे ईप्सप्स इति जाते पूर्वभागस्य प्स इत्यस्य अभ्याससंज्ञायाम् "अत्र लोपोभ्यासस्य" [अष्टाध्यायी ७.४.५८] इत्यनेन लोपे ईप्स इत्यस्य "सनाद्यन्ता धातवः" [अष्टाध्यायी ३.१.३२] इति सूत्रेण धातुसंज्ञायां "मतिबुद्धिपूजार्थेभ्यश्च" [अष्टाध्यायी ३.२.१८८] सूत्रेण वर्तमानकाले "तयोरेव कृत्यक्तखलर्थाः" इति नियमेन कर्मणि क्तप्रत्यये ईप्स त इत्यवस्थायाम् "आर्धधातुकस्येड्वलादेः" [अष्टाध्यायी ७.२.३५] इति सूत्रेण इडागमे ईप्सितशब्दो निष्पन्नः । अतिशयेन ईप्सितम् इत्यर्थे "अतिशायेन तमबिष्ठनौ" [अष्टाध्यायी ५.३.५५] इति सूत्रेण तमप्रत्यये विभक्तौ ईप्सिततमम् इति पदं निष्पन्नम् ।

ईप्सितशब्दे त्रयः अंशाः सन्ति । ते च आप्लृ व्याप्तौ इति धातुः, इच्छार्थकः सन्प्रत्ययः, आश्रयार्थकः क्तप्रत्ययश्च । तत्र धात्वर्थव्याप्तिश्च सम्बन्धः । स च क इति चेत् कर्तृपदार्थकुक्षिप्रविष्टः व्यापारविशिष्टफलाश्रयरूपः व्यापारद्वारकः सम्बन्धः एव । अत एवाह शब्दरत्ने "आप्नुमिति सम्बन्धुमित्यर्थः । केनेति । करणाकाङ्क्षाप्रदर्शनम् । विशेषणीभूतेनेति । कर्तृपदार्थविशेषणीभूतेनेत्यर्थः । उपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावादिति भावः" ।[४] स

[२] *व्याकरणमहाभाष्यम्*, पण्डितशिवदत्तशर्मा (सम्पादकः), पृ. २५१

[३] *व्याकरणमहाभाष्यम्*, पण्डितशिवदत्तशर्मा ; (सम्पादकः), पृ. २५१

[४] *प्रौढमनोरमा* (शब्दरत्नानन्याटीकासहिता), पृ. ४२

च प्रकारतासम्बन्धेन सनर्थेच्छायाम् अन्वेति। तादृशी इच्छा च उद्देश्यतासम्बन्धेन क्तप्रत्ययार्थविषये अन्वेति। ततश्च ईप्सितशब्दस्यार्थो भवति— व्यापारविशिष्टफलाश्रयत्वप्रकारिकेच्छानिरूपितोद्देश्यताश्रयः। तदेवोक्तं शब्दरत्ने—"एवं चेप्सितपदेन कर्तृव्यापारप्रयोज्यफलाश्रय उच्यते" इति।[५]

ईप्सितशब्दात् तमपि ईप्सिततमम् इति रूपम्। ननु तमप्प्रत्ययस्य या प्रकृतिः तत्प्रकारीभूतो योऽर्थः तद्गतातिशयत्वं तमपा द्योत्यते इति नियमात् प्रकृते तमप्प्रत्ययेन किङ्गतातिशयत्वं द्योत्येतेति चेदत्र तमप्प्रत्ययस्य प्रकृतौ द्वौ प्रकारीभूतौ धर्मौ वर्तेते धात्वर्थसम्बन्धः सनर्थः इच्छा च। अत्र तमप्प्रत्ययः धात्वर्थसम्बन्धे अन्वेति, लघुप्रयत्नतरः इत्यत्र लघ्वर्थे तरप्प्रत्ययवत्। अतः धात्वर्थसम्बन्धस्य अतिशयत्वं तमपा द्योत्यते। सनर्थे इच्छायां तमपः अन्वयः स्वीक्रियते चेद् अनिच्छया ग्रामादिगमने ग्रामं गच्छतीति प्रयोगानापत्तिः स्यात् ग्रामगमने इच्छाभावात्। अपि च स्वप्रयोज्यत्वसम्बन्धस्य प्राप्तिर्न स्यात्। अतः कर्तुरीप्सिततमं कर्म वारणार्थानामीप्सितः इत्यनयोः सूत्रयोः बाध्यबाधकभावो भवेत्। ततश्च परत्वाद् कर्तुरीप्सिततमं कर्म इत्यनेन अग्नेर्माणवकं वारयतीत्यादिषु अग्नेरपि कर्मसंज्ञा स्यात्। ततश्च वारणार्थानामीप्सितः इति सूत्रं सर्वदा निरवकाशं सत् कर्तुरीप्सिततमं कर्म इति सूत्रस्य बाधकं स्यात्। ततश्च अग्नेः माणवकात् वारयतीत्यनीष्टप्रयोगापत्तिः भविष्यति। स्पृहेरीप्सितः इत्यादिषु अपि तथैव बोध्यम्।

ईप्सितः इत्यत्र क्तप्रत्ययो वर्तमानकाल इत्यतः क्तस्य च वर्तमाने इति सूत्रेण कर्तृशब्दात् कर्तरि षष्ठी। प्रकृत्यर्थोऽपि कर्ता, प्रत्ययार्थोऽपि च कर्ता वर्तते। अतः घटो घटः इतिवत् प्रकृतिप्रत्ययार्थयोः द्वयोः कर्त्रोः शाब्दबोधो न स्यात्। कथमिति चेत् तद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति तद्धर्मभेदः कारणम्। प्रकारताविशेष्यतयोः कर्तृत्वरूप-समानावच्छेदकत्वाद् अवच्छेदकरूपधर्मभेदाभावात् शाब्दबोधो न स्यात्। अतः उच्यते प्रकृत्यर्थकर्ता व्यापाराश्रयरूपस्वतन्त्रपरकः, न तु कर्तृसंज्ञापरकः। तद्यथोक्तं प्रौढमनोरमायां—"कर्ता च धातूपात्त-

[५] *प्रौढमनोरमा* (शब्दरत्नानन्याटीकासहिता), पृ. ४२

व्यापाराश्रयः ।"[६] अनन्यलभ्यो हि शब्दार्थः इति सिद्धान्तात् प्रत्ययार्थः कर्ता आश्रयपरकः । प्रकृत्यर्थकर्ता स्वतन्त्रपरकः इत्यर्थास्वीकारे शत्रून् अगमयत् स्वर्गं हरिः इत्यादिषु णिजन्तधातुघटितवाक्यघटकस्य प्रयोज्यकर्तुः व्यापारजन्यफलाश्रयस्य कर्मसंज्ञा न स्यात् । कर्तृसंज्ञापरके स्वीकृते सति शत्रोः कर्तृसंज्ञाभावात् तद्वृत्तिव्यापारजन्यफलाश्रयस्य स्वर्गस्य कर्मसंज्ञा न स्यात् । गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ सूत्रेण कर्मसंज्ञायां जातायां कर्तृसंज्ञाभावः । णिजन्तधातुघटितवाक्ये स्वर्गः कर्तृवृत्तिव्यापारजन्यफलाश्रयो नास्ति, अपि तु कर्मवृत्तिव्यापारजन्यफलाश्रयः अस्ति । प्रत्ययार्थकर्ता व्यापाराश्रयरूपस्वतन्त्रपरकः, प्रकृत्यर्थकर्ता आश्रयपरको भवत्विति कथं न स्वीक्रियते इति चेत् प्रकृत्योपात्तः कर्ता कृधातुघटितत्वात् बलवान् । ननु प्रकृत्यर्थकर्ता व्यापाराश्रयपरकः, प्रत्ययार्थकर्ता आश्रयपरकः, आश्रयत्वरूपधर्मसाम्यात् दोषः तदवस्थ एव । ततश्च घटो घटः इतिवत् शाब्दबोधो न स्यात् इति चेदुच्यते विधेयांशे अधिकावगाहिज्ञानं भवति चेत् शाब्दबोधो भवति घटो नीलघटः इतिवत् । अत्र घटम् उद्दिश्य नीलघटत्वं विधीयते । घटः उद्देश्यः, नीलघटः विधेयः । उद्देश्यता घटे, उद्देश्यतायाः अवच्छेदकं घटत्वम् । विधेयता नीलघटे, विधेयतायाः अवच्छेदकं नीलघटत्वम् । उद्देश्यतावच्छेदकविधेयतावच्छेदकयोः भिन्नत्वात् शाब्दबोधो भवति । तथैव आश्रयत्वम् उद्दिश्य व्यापाराश्रयत्वं विधीयते । आश्रयः उद्देश्यः, व्यापाराश्रयः विधेयः । उद्देश्यता आश्रये, उद्देश्यतायाः अवच्छेदकम् आश्रयत्वम् । विधेयः व्यापाराश्रयः, विधेयता व्यापाराश्रये । विधेयतायाः अवच्छेदकं व्यापाराश्रयत्वम् । उद्देश्यतावच्छेदकविधेयतावच्छेदकयोः भिन्नत्वात् शाब्दबोधो भवति । कैश्चित् उद्भूतानुद्भूतभेदेन समाधानं क्रियते । कर्तृपदेन अनुद्भूतकर्तृत्वस्य बोधो भवति । ङस्प्रत्ययेन उद्भूतकर्तृत्वस्य बोधो भवति । अतः शाब्दबोधो भवति । केचित्तु व्यापारद्वयं प्रकल्प्य समाधानं कुर्वन्ति । अत एव लघुशब्देन्दुशेखरस्य बालबोधिनीव्याख्यायाम् आचार्यश्रीपादसत्यनारायणमूर्तिनोक्तं—"हरिं भजतीत्यादिप्रयोगसमवायिधात्वर्थकर्तुः प्रकृत्यर्थत्वेन, आप्नोतिकर्तुः

[६] *प्रौढमनोरमा* (शब्दरत्नानन्याटीकासहिता), पृ. ४१

प्रत्ययार्थत्वेन तयोर्भेदात्"[७] इति । अन्तिमसमाधानद्वयं भाष्यविरुद्धम् ।

कटं कृतवान्, कटं करिष्यतीत्यादिप्रयोगसिद्ध्यर्थम् ईप्सितशब्दे क्तप्रत्ययोपात्तं वर्तमानत्वम् अविवक्षितं स्वीक्रियते । अत एवाह दीक्षितः प्रौढमनोरमायाम्—"क्तप्रत्ययेनोपस्थितं वर्तमानत्वं नेह विवक्षितम्, तेन कटं करिष्यतीत्यादि सिद्ध्यति"[८] इति । वर्तमानस्य अविवक्षायां सत्याम् अस्य सूत्रस्याप्रवृत्तौ कर्तुरिति रूपं न सिद्ध्यति । तदोच्यते "तस्यापत्यम्" [अष्टाध्यायी ४.१.९२] इति सूत्रे लिङ्गवचनयोः उपलक्षणतया भानं तथैव क्तस्य च वर्तमाने सूत्रेपि वर्तमानकालस्य । अर्थात् उद्देश्यतावच्छेदकविशेषणतया भानाभावेपि उपलक्षणतया भानं भवति लिङ्गवचनयोः तथैव वर्तमानकालस्य । तदा क्तस्य च वर्तमाने सूत्रस्यार्थो भवेत्—वर्तमानकालिकस्य शक्तिमतः क्तप्रत्ययस्य योगे कर्तरि षष्ठी स्यात् ।

कर्तुरितिपदविचारः

कर्तृप्रकृतेः प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयः अर्थः । ङस्प्रत्ययस्य आश्रयः अर्थः । प्रकृत्यर्थः अभेदसम्बन्धेन प्रत्ययार्थे अन्वेति । आष्धातोः सम्बन्धः अर्थः, स च व्यापारविशिष्टफलाश्रयत्वरुपः । ङस्प्रत्ययोपात्तः आश्रयः वृत्तित्वसम्बन्धेन आष्धात्वर्थे सम्बन्धे अन्वेति । सन्प्रत्ययार्थे इच्छायां धात्वर्थसम्बन्धस्य प्रकारतासम्बन्धेन अन्वयो भवति । सन्प्रत्ययार्थस्य इच्छायाः निरूपितत्वसम्बन्धेन क्तप्रत्ययार्थस्यैकदेशे विषयतायाम् अन्वयो भवति । विषयतायाः स्वरूपसम्बन्धेन आश्रये अन्वयो भवति । आश्रयस्य चाभेदेन कारके अन्वयो भवति । कारकञ्चाभेदेन कर्मण्यन्वेति । तमप्प्रत्ययो धात्वर्थे सम्बन्धे अन्वेति । ततश्च सूत्रार्थो भवति—प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयाभिन्नाश्रयवृत्तिव्यापारविशिष्टफलाश्रयत्वप्रकारिका या इच्छा, तन्निरूपिता या विषयता, तद्विशिष्टं कारकं कर्मसंज्ञं स्यात् । वैशिष्ट्यञ्च स्ववाचकधातुवाच्यत्वेन, स्वप्रयोज्यत्वेन च । कर्तृपदग्रहणात् स्ववाचकधातुवाच्यत्वस्य, तमप्ग्रहणात् स्वप्रयोज्यत्वस्य लाभो भवति । प्रयत्नः प्रकृष्टयत्नः । स च वर्णोत्पत्तिप्राक्कालिकत्वम् । तथैव सम्बन्धगतातिशयत्वं नाम स्वप्रयोज्यत्वं स्वीक्रियते ।

कारकाधिकारे सूत्रस्यास्य पाठात् कर्तुरिति पदाभावेपि केनाप्युमिति

[७] *लघुशब्देन्दुशेखरः*, पृ. ३४

[८] *प्रौढमनोरमा* (शब्दरत्नानन्याटीकासहिता), पृ. ४१

करणाकाङ्क्षायां व्यापारस्य लाभेन सूत्रे कर्तुरिति पदग्रहणं व्यर्थम् । कारके इति सूत्रस्य पक्षद्वयेपि व्यापारस्य लाभो भवति । कारकं क्रियाजनकम् इत्यन्वर्थपक्षे विशेषणीभूतायाः क्रियायाः सत्त्वात् व्यापारस्य लाभः सम्भवति । कारकस्य क्रियापरकत्वपक्षे तु साक्षात् विशेष्यभूतायाः क्रियायाः व्यापारस्य लाभः सम्भवति । ततश्च सूत्रे कर्तुरिति पदाभावे कारकवृत्तिव्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यं कर्म इत्यर्थः स्यात् । तेन च माषेष्वश्वं बध्नातीत्यत्र माषस्यापि कर्मसंज्ञा स्यात् । देवदत्तः माषेषु अश्वं बध्नातीत्यत्र माषेषु प्रसक्तम् अश्वं माषनाशो मा भूदितीच्छया अन्यत्र बध्नातीत्यर्थः । कारकवृत्तिव्यापारेण न केवलं कर्तुः व्यापारस्य ग्रहणं भविष्यति, अपि तु कर्मादिकारकाणाम् अपि व्यापारस्य ग्रहणं भविष्यति । तेन बन्धनक्रियायाः कर्मणः अश्वस्य ईप्सिततमस्य माषस्यापि कर्मसंज्ञा स्यात् । तच्चानीष्टम् । सूत्रे यथा केवलं कर्तृवृत्तिव्यापारजन्यफलाश्रयस्य एव कर्मसंज्ञा भवेत्तदर्थं कर्तुरिति पदं प्रयोज्यम् । कर्तुरिति पदे प्रयुक्ते माषस्य कर्मसंज्ञा न प्राप्ता । यतोहि माषाः बन्धनक्रियायाः कर्मणः ईप्सिततमाः, न तु बन्धनक्रियायाः कर्तुः सन्ति ।

कर्तुरिति पदग्रहणेऽपि दोषः तदवस्थ एवास्ति । कथमिति चेद् अश्वः यद्यपि बन्धनक्रियायाः कर्ता नास्ति, तथापि भक्षणक्रियायाः कर्ता तु अस्ति । ततश्च कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यं कर्म इत्यर्थेऽपि कर्तृपदेन अश्वस्य ग्रहणाद्, अश्ववृत्तिगल-विलाधस्संयोगानुकूलव्यापारप्रयोज्यफलाश्रयत्वात् माषस्य कर्मसंज्ञा प्राप्ता । अतः सूत्रे कर्तुरिति पदं व्यर्थम् । तदोच्यते प्रकृतधात्वर्थव्यापाराश्रयस्य एव कर्तृग्रहणसामर्थ्यात् सूत्रस्थकर्तुरिति पदेन ग्रहणाददोषः । देवदत्तः माषेषु अश्वं बध्नातीत्यत्र प्रकृतधातुरस्ति बन्धनधातुः । तद्धातोः कर्तास्ति देवदत्तः, न तु अश्वः । अतः कर्तृवृत्तिव्यापारेण अश्ववृत्तिव्यापारस्य बोधो न सम्भवति । अतः सूत्रे कर्तुरिति पदग्रहणं कर्तव्यम् ।

देवदत्तः माषेषु अश्वं बध्नातीत्यत्र देवदत्तः पुष्ट्यर्थं माषक्षेत्रे अश्वं बध्नाति तदा भक्षणं कर्तृवृत्तिव्यापारप्रयोज्यमस्ति । सूत्रे तमब्ग्रहणात् स्वप्रयोज्यत्वस्य लाभो भवति । प्रयोज्यत्वं नाम जन्यं, जन्यजन्यमपि । प्रकृतवाक्ये देवदत्तवृत्तिव्यापारेण जन्यमस्ति बन्धनम् । भक्षणञ्च बन्धनजन्यम् । अतः कर्तृवृत्तिव्यापारप्रयोज्यफलत्वेन भक्षणस्यापि ग्रहणं स्यात् । तादृशस्य फलस्य

आश्रयत्वेन माषस्यापि कर्मसंज्ञा स्यात् । तच्चानीष्टम् । अतः कृतेपि कर्तुरिति पदग्रहणे लक्षणमिदम् एतादृशेषु वाक्येष्वतिव्याप्तम् । तत्परिहारार्थं यत्नः कर्तव्यः अतः उच्यते कर्तुरिति पदग्रहणसामर्थ्यात् प्रकृतधातुवाच्यत्वमेव फलव्यापारयोः उभयोरपि स्वीकर्तव्यम् । तेनात्र माषस्य कर्मसंज्ञा न प्राप्ता । कथमिति चेत् भक्षणं यद्यपि देवदत्तवृत्तिव्यापारप्रयोज्यमस्ति किन्तु प्रकृतधातुवाच्यव्यापारजन्यप्रकृतधातुवाच्यफलं नास्ति । प्रकृतधातुवाच्य-फलाभावात् तदाश्रयस्य कर्मसंज्ञा न भविष्यति । तदेवाह नागेशभट्टः लघुशब्देन्दुशेखरे—"तेन यदा पुष्ट्यर्थं माषभक्षणाय माषक्षेत्र एवाश्वबन्धनं तदा माषेष्वश्वं बध्नातीत्यादौ माषाणां न कर्मत्वम् । बन्धनप्रयोज्य-भक्षणफलाश्रयत्वेपि भक्षणाय बध्नात्यर्थत्वाभावात् । प्रयोज्यत्वनिवेशनाद् गां पयो दोग्धीत्यादौ विभागानुकूलव्यापारानुकूलव्यापारार्थकदुहियोगे पयसः कर्मत्वसिद्धिरिति स्पष्टं भाष्ये"[९] इति । प्रकृते प्रधानधातुरस्ति बन्धनधातुः, तद्धातोः फलम् अस्ति रज्जुशङ्कुसंयोगः । अतः रज्जुशङ्कुसंयोग-रूपफलस्य एव आश्रयस्य कर्मसंज्ञा भविष्यति । रज्जुशङ्कुसंयोगरूपफलस्य आश्रयोऽस्ति अश्वः, अतः तस्य एव प्रकृतसूत्रेण कर्मसंज्ञा भवति । ततश्च निष्कृष्टः सूत्रार्थो भवति—प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयाभिन्नाश्रय-वृत्तिव्यापारविशिष्ट-प्रकृतधातुवाच्यफलाश्रयत्वप्रकारिका या इच्छा, तन्निरूपिता या विषयता, तद्विशिष्टं कारकं कर्मसंज्ञं स्यात् । एवम्भूते सूत्रार्थे स्वीकृते लक्षणमिदं दोषत्रयशून्यं स्यात् ।

उपसंहारः

क्तस्य च वर्तमाने इति सूत्रेण कर्तृशब्दात् षष्ठी जाता । आध्यात्वर्थः सम्बन्धः । स च व्यापारविशिष्टफलाश्रयत्वरूपः । ईप्सिततमशब्दस्य रूढित्वस्वीकारे अनिच्छया ग्रामगमने ग्रामस्य कर्मसंज्ञा न स्यात् । अस्य यौगिकत्वस्वीकारे भाष्यं प्रमाणम् । कर्तुरिति पदाभावे माषेष्वश्वं बध्नातीत्यत्र माषस्य कर्मसंज्ञा स्यात् । एते विषयाः सविस्तारं शास्त्रानुसारं प्रतिपादिताः ।

* * *

[९] *लघुशब्देन्दुशेखरः*, पृ. ४२

Bibliography

1. *व्याकरणमहाभाष्यम्* (प्रदीपोद्योतसमुल्लसितम्), द्वितीयखण्डः ; पतञ्जलिः ; भार्गवशास्त्री (सम्पादकः) ; चौखम्बा-संस्कृत-प्रतिष्ठान ; दिल्ली ; २००६ ।
2. *व्याकरणमहाभाष्यम्* (प्रदीपोद्योतसमेतम्), प्रथमोध्यायः, द्वितीयखण्डः ; पतञ्जलिः ; गुरुप्रसादशास्त्री (सम्पादकः) ; राष्ट्रिय-संस्कृत-संस्थानम् ; देहली ; २००६ ।
3. *व्याकरणमहाभाष्यम्* (प्रदीपोद्योतसमेतम्), द्वितीयखण्डः ; पतञ्जलिः ; पण्डितशिवदत्तशर्मा (सम्पादकः) ; चौखम्बा-संस्कृत-प्रतिष्ठान ; दिल्ली ; २०२० ।
4. *प्रौढमनोरमा* (शब्दरत्नानन्याव्याख्योपेता), भट्टोजिदीक्षितः ; डा. रमाकान्तपाण्डेयः (व्याख्याकारः) ; चौखम्वा-विद्याभवन ; वाराणसी ; २०१५ ।
5. *प्रौढमनोरमा* (शब्दरत्नेन्दुकलाव्याख्योपेता) ; भट्टोजिदीक्षितः ; डा. वैद्यनाथझाः (व्याख्याकारः) ; रचना प्रकाशन ; जयपुर ।
6. *लघुशब्देन्दुशेखरः* (बालबोधिनीटीकासहिता), कारकान्तभागः ; नागेशः ; आचार्यश्रीपादसत्यनारायणमूर्तिः (सम्पादकः) ; राष्ट्रियसंस्कृतविद्यापीठम् ; तिरुपतिः ; २००८ ।

* * *